नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 21

No. of Printed Pages — 7

# VU—20–2—Sans. Vangmay II

# वरिष्ठ उपाध्याय परीक्षा, 2011

## संस्कृत वाङ्मय

## द्वितीयपत्रम्

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येक प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येक प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयम् ।

| प्रश्न क्रमाङ्कः | समुचितम् उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

**बहुविकल्पीयाः प्रश्नाः**

1. (i) शिववीरः कुत्र निवसति ?

(अ) सिंहदुर्गे (ब) चिक्कनदुर्गे

(स) प्रतापदुर्गे (द) चित्तौड़दुर्गे । 1

(ii) यवन-चमूपतिः अस्ति —

(अ) बदरदीनः (ब) शास्तिखानः

(स) चान्द्रखानः (द) अवरङ्गजीवः । 1

(iii) वीरभूमि-काव्ये कस्य छन्दसः प्रयोगः बाहुल्येन कृतः ?

(अ) इन्द्रवज्रा (ब) उपेन्द्रवज्रा

(स) वसन्ततिलका (द) भुजङ्गप्रयातम् । 1

(iv) चाणक्यः केन अपमानितो अभवत् ?

(अ) चन्द्रगुप्तेन (ब) नन्दराजेन

(स) अमात्येन (द) मुरया । 1

**अतिलघूत्तरात्मकाः प्रश्नाः**

2. चान्द्रखानं कः हन्ति ? 1

3. रमा कस्य पुत्री आसीत् ? 1

4. "गुणत्रयविकारभरात् परा" का अस्ति ? 1

5. भूतानां पर्जन्य इव आश्रयः कः भवति ? 1

**लघूत्तरात्मकाः प्रश्नाः I**

6. चान्द्रखानः महादेवस्य वार्ताः श्रावं श्रावं किं संशयति ? 2

7. कालीमन्दिरस्य वर्णनं कुरुत । $1\frac{1}{2}$

8. नीलकण्ठमन्दिरस्य वर्णनं कुरुत । $1\frac{1}{2}$

9. विलासवत्यनुसारं नन्दराजस्य कीदृशः व्यवहारः अस्ति ? 2

**लघूत्तरात्मकाः प्रश्नाः II**

10. शिवराजविजयस्य रचयितुः परिचयो लिखत । 3

11. वीरभूमिकाव्यस्य रचयितुः परिचयो देयः । 3

12. इन्द्रः जर्जरनाम्ना कथं प्रसिद्धिं ययौ ? 2

13. नाटकस्य लक्षणं लिखत । 2

14. चन्द्रगुप्तविजयनाटकस्य प्रथमाङ्कस्य सारं संक्षेपेण लिखत । 2

**निबन्धात्मकाः प्रश्नाः**

15. अधोलिखितेषु कयोश्चिद् **द्वयोः** गद्यांशयोः प्रसङ्ग-कोष-व्याकरणालङ्कारपुरस्सरं संस्कृत व्याख्या कार्या — $\left(\frac{1}{4}+\frac{1}{4}+\frac{1}{4}+\frac{1}{4}+2\right) \times 2 = 6$

(अ) अथैकदा रजन्यां सिंहदुर्गाविदूर एव सुकोमलशादायां कलितप्रसादायां केकि-केका-विहित-प्रहरि-प्रातिनिध्यायां भुवि, निष्कृपकृपाणपाणिः, कञ्चुकाच्छादित-कठिन-कवचः कलित-सैनिकभटवेषः श्री शिववीरो गुप्तवेषेण परितः पर्य्यटन् , दुग्धधारयेव क्षालितैर्ज्योत्स्नया प्रकाशितैः पथिभिरासन्नात् शिवमन्दिरादाराजगाम ।

(ब) परं वयं कवयः कस्याापि राजत्वं वा प्रतापित्वं वा आढयत्वं वा नापेक्षामहे, न वा कस्यापि साभिमान-भ्रूभङ्गम् उत्तुङ्ग-कोपाञ्चिताखर्व-गर्व बर्बरतां वा सहामहे । न तस्य तादृशं भू-वलये राज्यं यादृशमस्माकं सारस्वतसृष्टौ । तस्य क्रीतदासा अपि न तदीहा-समकालमेव बद्धकर-सम्पुटा यथोचितावस्थानाः पुरोऽवतिष्ठन्ते, यथाऽस्माकं पदानि वाक्यानि छन्दांसि अलङ्काराः रीतयो गुणाः रसाश्च ।

(स) भगवन् ! यः क्षत्रियता-धूर्धरः, येन राजन्वतीयं भूः, योऽस्मादृशानामभिमान-भाजनम् , यस्मिन् धर्म-धुरन्धरा आग्रहग्रहिलाः, यं पीयूष-पूरमिव चक्षुश्चषकैश्चिराय पिपासामहे, यः सनातन-धर्मरक्षाया एकमात्रं शरणम् , यश्च-भारतीय-वीरकुल-मुकुटमणिः, तमेवाद्य एतेषां दासपदलाञ्छनमालोक्य शोकाकुलो महाराष्ट्रराजः ।

16. अधोलिखितेषु कयोश्चिद् **द्वयोः** गद्यांशयोः प्रसङ्ग-कोष-व्याकरणालङ्कारादि पुरस्सरं संस्कृत व्याख्या कार्या — $\left(\frac{1}{4}+\frac{1}{4}+\frac{1}{4}+\frac{1}{4}+2\right)\times 2 = 6$

(अ) इति वक्तारं कमपि कविं व्यक्त-दिल्लीश-द्वारं निजं दिदृक्षुमत्राऽऽगतमूरीकृत्य, पुनः परिक्रम्य द्वारमार्गेण मन्दिरं प्रविश्य, शिवं प्रणम्य, घण्टामाहत्य, बिल्वदलमुत्थाप्य, नेत्रयोः संस्पृश्य, शिखायां संस्थाप्य, मृत्तिका-शरावस्थं भस्मालिके विलिप्य, प्रदक्षिणच्छलेन पान्थाध्युषित-प्रदेशमागत्य, तेनाऽऽलपन्तं शिवमन्दिराध्यक्षं प्रणम्य, बद्धाञ्जलिरागन्तुकमपि — "कुतः श्रीमान् ? कः श्रीमान् ?" इति सादरं समपृच्छत् ।

(ब) महाराजस्तु "साधु साधु" इति व्याहृत्य, पुनः पठितुमाज्ञप्तवान् । पठितवति च तस्मिन् सर्वेषु प्रसन्नेषु पुनरप्यादिशत् । इत्येवं विंशतिवारं तेन सा ब्रज-भाषामयी "कवित्वकाम" नामिका वृत्तिरपाठि । महाराजेन च तस्मै गजानां विंशतिर्वितीर्णा-इत्यद्यापि प्रसिद्धं कवितारसिकानां मण्डले । तदेव च दिनमारभ्य तेन भूषण-कविः स्व-सभायां संस्थापितः ।

(स) दूतवर ! साधु, तव भाषणभङ्गीमत्यन्तं प्रशंसे । न तव भाषणे गौरवमवगूर्य्यते, पदवैधुर्यं ध्रियते, प्रसादो निरस्यते, संशयापादक-पद-प्रचयो वा प्रचीयते । विलक्षणं तव पाटवमालापेषु, गहन-गहनैः, कोमल-कोमलैः, मधुर-मधुरैः, वाचां विलासैर्मनोहरसि । यदेव वक्तुं प्रवर्त्तसे, तन्मूर्तिमिव पुरो विलिखसि, यदेव वक्तुमीहसे, तदासार-प्रसारैरिव परितः प्लावयसि ।

17. अधोलिखितेषु कयोश्चिद् **द्वयोः** पद्ययोः प्रसङ्गान्वयकोषछन्दसहिता संस्कृत-व्याख्या विधेया — $\left(\frac{1}{2}+\frac{1}{2}+\frac{1}{4}+\frac{1}{4}+2\right)\times 2=7$

(अ) आसीदनेकमखधूमवितानपुता,
ख्याता पुरी जगति मध्यमिकाभिधाना
मौर्यान्ववायनलिनीवनभास्कराणाम् ,
यासीत्पुरा क्षितिभृतां वरराजधानी ॥

(ब) पश्यादिसानुनिपतच्छिशिराम्बुधार -
निर्धौतपादपकुलं सलिलप्रपातम् ।
यत्राऽतितीव्रतपनेऽपि निदाघकाले,
वर्षाप्रमोदमनुविन्दति पौरवृन्दम् ॥

(स) दृष्टं हि दुर्गमभितः समटाट्यमानैः,
युष्माभिरेतदखिलं स्वविलोचनेन ।
चेतस्तथापि परिचिन्त्य चलाचलत्वं,
लोकस्य किं न सहसा भजते विरागम् ॥

18. चित्रकूट नगर्याः आत्मवृत्तान्ते कथितां देव-ब्राह्मण-राजगृहाणां वन-उपवनस्थलीनाञ्च दुर्दशां वर्णयत । 4

19. अधस्तनपद्ययोः कस्यचिद् एकस्य प्रसङ्गान्वयछन्दोऽलङ्कारादि पुरस्सरं संस्कृते व्याख्या कार्या — $\frac{1}{2}+\frac{1}{2}+\frac{1}{2}+\frac{1}{2}+1\frac{1}{2}=3\frac{1}{2}$

(अ) गुणिनां गुणसंवेत्ता गुणग्राहिजनश्चिरम् ।
अतो विजयतां नित्यं भारते सुरभारती ॥

(ब) मोचयामि शिखां चेमां ज्वलन्तीं ब्रह्मतेजसा ।
सवंशे त्वयि संनष्टे ग्रन्थिष्यामि पुनश्च ताम् ॥

20. अधोलिखित गद्यांशयोः कस्यचिद् एकस्य प्रसङ्गकोषव्याकरणादिपुरस्सरं संस्कृते व्याख्या विधेया — $\frac{1}{2} + \frac{1}{2} + \frac{1}{2} + 2 = 3\frac{1}{2}$

(अ) चाणक्यः — अरे, पृच्छसि माम् ? पश्य पश्य - विशालं दर्भहीनं प्रान्तरं दिगन्तरेखां चुम्बति । हाः - हाः - हाः ( अट्टहास्यं करोति ) ऊर्ध्वे दिगन्तप्रसारी नीलिमा, अधश्चोच्छिन्नदर्भाङ्कुरं धूसरप्रान्तरं प्रान्तभूमिरिव हसति । अधुना दर्भमूलेषु सशर्करं तक्रं निक्षिपामि । ( तक्रधारां निक्षिपति ) यतः अरयः समूलमुत्खातयितव्याः ।

(ब) बालिका — मैवम् । ब्राह्मण्यं न तु वीर्यहीनम् । क्षात्रधर्माद् विच्छिन्नं ब्राह्मण्यं न हि जीवति । क्षात्रं च वृत्तं तथैव । स्मर तावद् भारतवर्षस्येतिवृत्तम् । वैराग्यमाश्रितेषु नरपतिषु क्षात्रधर्मो भारतवर्षाद् विलुप्तिं गतः । तेन समभवदभिनवो विपर्ययः । अतो ब्राह्मण्याश्रित- क्षात्रशक्ति-प्रतिष्ठया प्रयोजनं सञ्जायते ।

21. चन्द्रगुप्तस्य चरित्र-चित्रणं कुरुत । 3